अर्हम्

श्रीयशोविजयजैनग्रन्थमाला [१८]



श्रीचारित्रसुन्दरगणिविरचितं

शीलदूतम् ।

शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरिपादा-
म्भोजचञ्चरीकायमाणाभ्यां
पं०—श्रावकहरगोविन्ददास—वेचरदासाभ्यां संशोधितम् ।

तच्च

वाराणस्यां

श्रेष्ठिभूराभाईतनुजहर्षचन्द्रेण निजधर्माभ्युदययन्त्रालये
मुद्रितं प्रकाशितं च ।

मूल्यम् ।)

प्रस्तावना ।

—:०:—

अस्य सचेतनचेतश्चमत्कारकारिसमस्यापूर्त्तिमयस्य खण्डकाव्यस्य कवितारः श्रीचारित्रसुन्दरगणयः श्रीविक्रमार्काच्चतुर्दशशताब्दां व्यतीतायां स्वसत्तामुपलब्धवन्तः, संदब्धवन्तश्च तस्यामेव सप्ताशीत्यधिकायां (१४८७) इदं ग्रन्थरत्नमिति

"ब्रह्मे रङ्गैरतिकलतरे स्तम्भतीर्थाभिधाने
वर्षे हर्षाज्जलधिभुजगाऽम्भोधिचन्द्रप्रमाणे ।
चक्रे काव्यं वरमिह मया स्तम्भनेशप्रसादात्
सद्भिः शोध्यं परहितपरैरस्तदोषैरसादात्" ॥ १ ॥

इत्येतत्पद्यैवाऽन्तिमश्लोकेन निर्विवादं संवेदनविषयतामुपयाति । एतेन गूर्जरदेशान्तर्गतस्तम्भन(खंभात)नगरे ग्रन्थस्यास्य प्रणयनं संजातमित्यपि वक्तव्यं निर्व्यूढम् ।

अधिकृतं चात्र समूलमुन्मूल्य महामोहदुर्गम्, समुत्पाट्य कामं कामवैरिणम्, अधिशील्य सुष्ठु परां काष्ठामधिष्ठितं ब्रह्मचर्यमहाव्रतम्, समासाद्य च श्रुतापारपारावारपारीणतां, शमसंवेगसौधमध्यमध्यासीनानां महामहिम्नां श्रीस्थूलभद्रप्रभूणां जगद्विस्मयावहं शीलसंशीलनविषयं लोकोत्तरं वृत्तम् । निर्वर्णितं च सुललितपदोपन्यासेन सरसतापादनेन च चित्तार्कर्षिण्या सुसंबद्धपद्धत्या कविवरैः ।

एते ग्रन्थकर्तारोऽन्यानपि श्रीकुमारपालमहाकाव्य–श्रीमहीपालचरिताऽऽचारोपदेशादीननेकान् प्रौढप्रबन्धान् निबबन्धुः, येषु निःसंशयं संवदत्सु कर्तृणां निरवद्यविद्याप्रगल्भताम्, न भवति तेषां प्रतिभाप्रकर्षशालित्वे कथंकथिकतायाः कथं कथमपि प्रवेशलेशावकाशः ।

एतस्य च ग्रन्थस्य मुद्रणावसरे हस्तलिखितं पुस्तकद्वयं समासादितम्—

१ अस्मद्गुरुवर्यशास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरिद्वारा श्रीपुण्यपत्तनस्थराजकीयपुस्तकालय(डेक्कनकॉलेज)स्थं, प्रान्तभागे चैतद्दुःखसमुल्लसितम्—

"पादसाहश्रीअकबरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकल्पमोचनाद्यनेकग्रन्थकृतविद्यापकमहोपाध्यायश्रीभानुचन्द्रगणिशिष्याष्टोत्तरशतावधानसाधनप्रमुदितपातिसाहश्रीअकबरपातिसाहजिहांगीरप्रदत्त खुशफहम–नादिरज़्ज़मान–द्वितीयाभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशिष्येण मुनिसुबुद्धिचन्द्रेण लिखितं काव्यमेतत्। संवत् १७०१ वर्षे आश्विनवदिद्वितीयायां श्रीकर्पटवाणिज्यनगरे"।


२ मुनिश्रीदेवविजयेन प्रेषितम्।

इत्यत्र तयोर्धन्यवादपुरस्सरमुपकार उररीक्रियते।

तदेवं पुस्तकद्वयाधारेण संशोध्य पाठान्तरैः परिष्कृत्य विषमस्थले टिप्पनादिना विशदीकृत्य च संपादितेऽप्यस्मिन् ग्रन्थे यत्र क्वचन दृष्टिदोषनिबन्धना वा अज्ञानसहभाविन्यो वाऽक्षरयोजकसंभविन्यो वा स्खलनाः स्थिता भवेयुः, प्रकृतिकृपालवः सज्जनास्ताः शोधयिष्यन्तीति—

प्रार्थयेते—

हरगोविन्द–बेचरदासौ।




अर्हम्

श्रीविजयधर्मसूरिभ्यो नमः ।

श्रीचारित्रसुन्दरगणिविरचितं

शीलदूतम् ।



भुक्त्वा भोगान् सुभगतिलकः कोशया सार्द्धमिद्धान्
धन्यो मान्यो निखिलविदुषां भद्रया स्थूलभद्रः ।
चक्रे श्रुत्वा जनकनिधनं जातसंवेगरङ्गः
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥
चित्ते मत्वा विषयनिचयं सत्वरं गत्वरं वै
गच्छन्नेषोऽध्वनि घनजिनध्यानसंलीनचित्तः ।
शान्तं कान्तं रसमिव गिरौ श्रीगुरुं भद्रबाहुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥
शिक्षाकामं कृतनतिममुं ध्वस्तकामं निरीक्ष्या-
चख्यावेवं गुरुरुरुगिरा वत्स ! मोहं जयैतम् ।
संयोगेऽपि प्रभवति यतः प्राणिनामत्र दुःखं
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ? ॥ ३॥
धन्यं मन्ये मुनिपरिवृढात्मानमेनं किलाद्या-
निन्द्यं सद्यः परमसुखदं यन्नतं वः पदाब्जम् ।
पीत्वा हृद्यां विशदहृदयो देशनां सोऽपि सूरेः
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥
कामान्धोऽहं तदिह बहुधा कर्म मोहादकार्षं
जानात्यन्यो नहि जिनपतेर्यद्विपाकं मुनीश ! ।
यावज्जैनीं वचनरचनां वा न विन्दन्ति तावत्
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ॥ ५ ॥

---

१ तन्नाम्न्या । सरलस्वभावया । पितुर्मरणम् । रमणीयपर्वताश्रमेषु । ३ कृतनुतिमिति पाठान्तरम् । मोहात् । ४ हे मुनिपते ! ।

जाने युष्मान् जिनपतिसमान् ज्ञानदानप्रवीणान्
रीणोऽमुष्मादनणुभवतो भावविद्वेषिजेतॄन् ।
याचे तस्माच्चरणशरणं वः शरण्याः ! रणन्नं
याचित्वा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥
कृत्वा लोचं शिरसि सहसा पञ्चभिर्मुष्टिभिः स्वै-
र्लात्वा दीक्षां गुरुवचनतः सैष शिक्षामवेत्य ।
गुर्वादेशादथ निजपुरीमागमत्तां यतिर्या
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्यां ॥ ७ ॥
कोशा शस्यप्रकृतिरथ सा स्वप्रियं चानुयान्ती
दध्यावेवं विविधवचनैरस्वया संनिषिद्धा ।
तिष्ठेत् को हा ! स्वगृह इह हि प्रोषिते प्राणनाथे ?
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥
प्राप्तं द्वारि प्रियतममथो वीक्ष्य सोचे प्रमोदा-
देवोत्तुङ्गं भज निजगृहस्यैनमग्र्यं गवाक्षम् ।
स्निग्धच्छायं वनमिव जनानन्दनं यत्र संस्थं
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥
अद्य श्वो वा सखि ! तव वरः स्थूलभद्रः समेता
स्वस्थं तस्मात् कुरु निजमनो मुञ्च मुग्धे ! विषादम् ।
दध्रे प्राणानहमिति सखीभापितैर्नाथ ! वाऽऽशा
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥ १० ॥
स्वामिन्नङ्गीकुरु परिचितं स्वाधिकारं पुनस्तं
भोगान् भुङ्क्ष्व प्रिय ! सह मया साधुवेषं विहाय ।
दोलाकेलिं किल कलयतः कौतुकात् काननान्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥
पश्य स्वामिन्निजपरिजनं त्वद्वियोगार्त्तिदीनं
हीनं स्थाने जलविरहिते मीनवत्पीनदुःखम् ।
त्वत्संयोगे मुदितमनसो वीक्षिता यस्य शस्या

---

६ दीर्घसंसारात् । हे शरणसाधवः ! । गुणाधिके पुंसि । ७ खे इति च पाठः । ९ खे गगने, वर्तमाना इति शेषः । १० वाशब्दोऽर्थान्तरे । ११ गगने श्रावणमासे वा ।

स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥
मा जानीष्व त्वमिति मतिमन्! संयमं मुञ्चतो मे
नाशं यास्यत्यवनिविदिता कीर्त्तिविस्फूर्त्तिरेषा।
सिद्धिं याता पुनरपि यथा सिन्धुपूरः प्रदानैः
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य ॥ १३ ॥
जग्मुर्मुक्तिं कति न भरताद्याः समाराध्य दानं?
भुञ्जन् भोगान् सुभग! भव तद् दानधर्मोद्यतस्त्वम्।
कीर्त्या मूर्तीस्त्वमपि सितयन् स्वःश्रियां सिद्धिमेता
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥
स्वामिन्! सिंहासनमनुपमं त्वं प्रसद्याश्रयेदं
नानारत्नद्युतिततिकृतस्फारचित्रं पवित्रम्।
येनं स्निग्धं वपुरुपचितां कान्तिमापत्स्यते ते
वर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥
मन्ये जज्ञे कुलिशकठिनं तावकीनं हृदेत-
द्यस्मादस्मानपि नहि दृशा स्निग्धया पश्यसि त्वम्।
पश्येयं त्वां वदति सरसं सारिका देव! मा मा
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥
आलापस्त्वां मृगय मुदितः कोमलैः कोकिलायाः
क्रीडारामो भवदुपचितः स्वागतं पृच्छतीव।
नो नीचोऽपि प्रणयनिभृते भाग्यलभ्ये चिराद्वा
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः?॥ १७ ॥
दध्रे मासान्नव किल यया मध्यमध्ये सुधीमन्!
वृद्धिं नीतः सरसमधुराहारयोगाद् भवान् वा।
गेहस्थोऽपि प्रिय! गुरुगुणां मातरं मानयैनां
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १८ ॥

---

१३ सा कीर्त्तिविस्फूर्तिः पुनरपि प्रकृष्टदानैः सिद्धिं समृद्धिं याता, यथाशब्द इवार्थे यथा सिन्धुपूरः स्रोतसां पय उपयुज्य समृद्धिं याति। चोपभुज्येति पाठान्तरम्। १४ त्वमपि सिद्धिं मोक्षं एता याता, किं कुर्वन् सन्, पथि मार्गे स्वःश्रियां स्वर्गस्त्रीणा स्थूलहस्तावलेपान् परिहरन्, पुनः किं० दिङ्नागानां मूर्तीः सितयन् धवलयन् १५ मयूरपिच्छेनेव। १७ पश्य। विराद्धेति पाठान्तरम्। १८ उदरमध्ये।

स्वप्यायाते धरणिरमणीसारशृङ्गारकल्पे
प्रासादोऽयं प्रिय ! निजरुचा जेष्यति स्वर्गलोकम् ।
विष्वक्शुद्धस्फटिकरचितस्निग्धनीलाप्रभागो
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १९ ॥
क्रीडाशैले कलय विपुले निर्झरालीं विलीनां
यत्रावाभ्यां श्रमरतिकृते क्रीडितं नाथ ! पूर्वम् ।
यामालोक्याकलयति कलं निद्रमन्थरलोको
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ २० ॥
मा मुग्धेदं भवनमनिशं नाथ ! सम्पूरिताशं
सर्वं चैनं निजपरिजनं स्वप्यतिक्लेशयुक्तम् ।
नीतिज्ञोऽपि प्रकृतमहिमन् ! वेत्सि नैतत्कथं वत ?
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २१ ॥
व्यापारं मा परिहर वर ! त्वं नृपश्रीसमं ते
प्राप्य क्लेशोपशमिममहो ! संयमं मन्त्रिपुत्र ! ।
मुग्धेभिन्तामणिमिह हि कः काचमादाय यन्मिन् ?
सारङ्गास्ते जलमवनुचः सूचयिष्यन्ति मार्गम् ॥ २२ ॥
तीव्रं यत्त्वं तपसि सुतपो देवलोकाशयेह
स्त्रीसम्भोगादपरमरिरे ! नास्ति तत्रापि सौख्यम् ।
गेहव्यक्तोच्चय सुचिरं स्वर्गसौख्याधिकानि
सोत्कण्ठानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २३ ॥
नीत्वा नीत्वा कतिपयदिनं यौवनं गेहवासे
भुक्त्वा भोगानवनिवलये नाथ ! तत्वा स्वकीर्त्तिम् ।
वार्द्धक्येऽथ प्रिय ! निजजनैः साधुदृग्भिर्व्रताय
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ २४ ॥
ताते याते त्रिदशभवनं युष्मदाशानिबद्धा-
ये जीवन्ति प्रिय ! परिहरंस्तान्न किं लज्जसे त्वम् ? ।
आयाभावात् त्वयि सति गते बान्धवास्तेऽस्तवित्ताः

---

२० पण्डितरचनाप्रकारैः । २२ सारं सलीलं गच्छन्तीति ते सारङ्गाः ।
२४ विस्तीर्य, वार्द्धक्ये व्रताय व्यवस्येत उद्यमं कुर्यात्, कथमिवेति च पाठः ।

संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २५ ॥
भुङ्क्ते भोगान् किमिह न भवान् नन्दिपेणोऽपि तस्थौ ?
वेश्याऽऽवासे चिरविरचितं प्रोज्झ्य चारित्रमुच्चैः ।
मुह्येत् को नो शुचि सुललितं वीक्ष्य वा वारनार्य्याः
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ? ॥ २६ ॥
क्रीडाशैलो वर ! गुरुरयं राजते ते पुरस्ता-
च्चक्रे केलिः किल सह मया यत्र चित्रे त्वया प्राक् ।
स्निग्धच्छायैर्विमलसलिलैः सत्फलैर्यो जनाना-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २७ ॥
अस्मिन् सान्द्रद्रुमचयाचिते पर्वते वर्त्तते ते
क्रीडोद्यानं सुरवनसमं नाथ ! सर्वर्तुकाख्यम् ।
स्वेदं शीतो हरति सुरभिः संमतो यत्र वायु-
श्छायाऽऽदानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २८ ॥
स्वामिन्नस्मिन् स्मरगृहसमे कानने तावकीने
कामक्रीडां विदधति समं निर्जराः सुन्दरीभिः ।
स्नेहस्निग्धैस्त्वमिह रतिदैर्वीक्षितोऽपि प्रियाणां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २९ ॥
लोलच्छाखाशयविलसितैस्त्वामिवाकारयन्ती
भृङ्गालापैरिव तव तपः साम्प्रतं वारयन्ती ।
वृक्षालीयं कुसुमपुलकं दर्शयन्तीव पश्य
स्त्रीणामाद्यं प्रणयि वचनं विभ्रमो हि प्रियेषु ॥ ३० ॥
हीनं दीनं सुभग ! विरहात् ते धुताऽऽहारनीरं
पश्येदं मे वपुरुपचितिं याति नान्यैः प्रयोगैः ।
जाने नाहं बहु निगदितुं त्वद्वियोगार्त्तिजातं
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३१ ॥

---

२५ परिहरन् स्वानित्यपि पाठः । कतिपयदिनस्थायिप्राणाः, दशानां ऋणं विद्यते येषां ते। २६ वाऽथवा वारनार्याः मुखं वीक्ष्य को न मुह्येत्? अपिशब्दात् सर्वोऽपि। किंलक्षणं मुखं, उत्प्रेक्ष्यते, वेत्रवत्या नद्याः पय इव। किंलक्षणं पयः, चलोर्मि चञ्चलतरङ्गम्। २८ मालाकारपत्नीमुखानाम् । ३० लोलन्त्यश्चञ्चला याः शाखास्ता एव शया हस्तास्तासां विलासैः ।

गेहं देहं श्रिय इव भवत्कारितं भर्त्तरेतद्
भाग्यैर्लभ्यं नय सफलतां स्वोपभोगेन नाथ ! ।
स्वल्पीभूते स्वकृतसुकृते नाकिनां भूगतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥ ३२ ॥
अङ्कीकृत्य प्रिय ! गुरुतरां मन्त्रिमुद्रां समुद्रां
दानैरस्यां पुरि हर चिरं लोकदारिद्र्यमुद्राम् ।
यत्रावन्त्यामिव सुरसरिद्धन्ति तापं च शीतः
सिप्रा वातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३३ ॥
पश्य स्वामिन् ! सुविपुलमिदं पाटलीपुत्रदुर्गं
गङ्गोत्सङ्गे नृपतितिलकः कोणिकोऽस्थापयद् यत् ।
यस्याग्रेऽद्यो ! विविधमणिभिः पूरितस्य क्षमायां
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ३४ ॥
आद्यं नन्दं नृपतिमवधीदत्र वैरोचनः प्रा-
गत्रारामः सततफलदोऽत्राभवत् तस्य राज्ञः ।
अत्रोदायिप्रभुरपि हतः पापिना तेन दम्भा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥ ३५ ॥
खिन्नोऽसि त्वं चिरविचरणाद् दृश्यतेऽनीदृशस्ते
देहस्तन्नो निजपरिजनेनाऽमुना जन्पसि त्वम् ।
हर्म्येष्वेषु प्रिय ! निवसनात् सज्जयास्मिंस्तनुं स्वां
नीत्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३६ ॥
द्रङ्गोत्सङ्गे सगरतनयाऽऽनीतवाहां वहन्तीं
गङ्गामेतां सुभग ! मृगयालोलकल्लोलमालाम् ।
धर्मस्वेदं हरति कुरुते या रतिं श्राग् नराणां
तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३७ ॥
वासं कुर्वन्नवनिविदिते नित्यरङ्गेऽत्र द्रङ्गे
गाङ्गैर्नीरैरनिशममृतस्वादमावेत्स्यसि त्वम् ।
गङ्गाघोषैः श्रुतिसुखकरैरन्वहं चाब्दजाना-

३२-दुर्तमिवेति पाठान्तरम् । ३३ सुमन्त्रामिति च पाठः । यत्र सुरसरित् तापं हन्ति, केव, अवन्त्यां सिप्रेवः च पुनर्यत्र वातः शीतो वाति । ३४ द्रङ्गं नगरम् । ३५ तन्नामा मन्त्री । ३७ मृगय सुभगा- इत्यपि पाठः ।

भामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३८ ॥
नो मुञ्चन्ति प्रिय ! निजकुलाचारभारं महान्तो
व्यापारं तत् कुरु गुरुमसुं पूर्वजाचाररूपम् ।
स्नेहाद्यस्मिन् सति हि समुदः पौरनार्योऽतिवर्या-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ ३९ ॥
पायं पायं शुचि सुललितं बन्धुवाक्यं पयो वा
स्वादं स्वादं सरसमधुराहारमेयाः प्रमोदम् ।
स्वामिन् ! नित्यं शिव इव मया सस्पृहं वीक्ष्यमाणः
शान्तोद्वेगः स्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ४० ॥
कार्या शश्वद् भृतिरिह मया वः पुरेत्युक्तिपूर्वं
पाणौ प्रादात् प्रिय ! किल भवान् यत्पयो मत्सखीनाम् ।
गृह्णन् दीक्षां निजपरिजनं त्वं विमुञ्चन् क्षणात् तत्
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥ ४१ ॥
व्यापारस्ते यदि न हृदये संमतो ज्ञाततत्त्वे
वाणिज्येनार्जय धनचयं त्यागभोगक्षमं तत् ।
अङ्के क्षिप्तानव तव पुराऽनेन पित्रा स्वबन्धून्
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४२ ॥
पूर्वैः पूर्वे मम खलु समे मानिता ह्यस्य पूर्वं
तन्मान्योऽसौ सचिवतनयो मे जिघृक्षुस्तपस्याम् ।
मत्वा नन्दो नृप इति चिरं त्वाऽनुनेतुं प्रमोदात्
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४३ ॥
दीक्षामेषा तव सुरनदी वारयत्यूर्मिरावैः
पश्य स्वामिन् ! बहुपरिचिता प्रेयसीवेयमुच्चैः ।
अस्याः शस्याशयरयकृतान्यर्हसि त्वं न विद्वन् !
मोघीकर्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥ ४४ ॥
कान्तावाचा चिरकृतमहो ! प्रोज्झ्य चारित्ररत्नं

---

४० हे स्वामिन् ! त्वं प्रमोदं हर्षं एयाः यायाः । ४१ कोशपानम् । ४२ तेनेति पाठान्तरम् । अङ्गीकृतार्थसार्था मन्दा न भवन्ति । ४३ प्रत्यावृत्तः प्रवृत्तः । त्वयि कररुधि भवति करमवगणय्य याते सति अनल्पेर्ष्यः स्यात् । धातूनामनेकार्थत्वात् ।

भेजे भोगान सुभग ! वितताना[र्द्र]पूर्वः कुमारः ।
सोऽस्याद् गेहे प्रिय ! जिनमितान् वत्सरान स्नेहतो वा
ज्ञातास्वादो विपुलजघनां को वितातुं समर्थः ?॥ ४५ ॥
सूदर्कं तत्प्रिय ! मम वचो मानयित्वा गृहे स्वे
तारुण्यं त्वं नय विनयतः प्रार्थ्यमानः प्रियाभिः ।
वर्षाकाले तव विहरतः शर्मकर्त्ता वनान्तः
शीतो वायुः परिणमयिता काननोदुम्बराणाम ॥ ४६ ॥
अङ्गीकृत्य प्रियतम ! महामाल्यमुद्रां सुभद्रां
सान्द्रानन्दं कुरु निजपतिं नन्दनामानमेनम ।
भूयाद् भूयस्तव जनकवन् शत्रुतृण्यावलीना-
मत्यादित्यं हुतवह ! मुखे संभृतं तद्धि तेजः ॥ ४७ ॥
क्षामं कामं तव वपुरभूत तत्र तीव्रैस्तपोभि-
र्भक्त्या कल्पं प्रियतम ! मया भोजनं तत्र कुरु प्राक् ।
दक्षा नाट्ये जितसुरवधूर्नर्त्तकीमर्दलानां
पश्चाद्दिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥ ४८ ॥
पुण्याय त्वं स्पृहयसितरां तत्परं नोपकारान
स स्यात्प्रायः प्रियवर ! सरःकूपवार्पीविधानैः ।
कुर्याः श्रेयः प्रतिदिनमिदं तद्द गृहस्थोऽपि लुम्पन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ॥ ४९ ॥
यं तातस्ते पुरहितकृतेऽकारयच्छिल्पिसारैः
प्राकारं तं स्फटिकघटितं नाथ ! पश्याभ्रलग्नम् ।
यं वीक्षन्ते दिवि दिविषदो नीलवेषायुतं श्रा-
मेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ५० ॥
कामो वामं रचयतितरां यौवने नाथ ! चित्तं
योगाभ्यासोद्यतमतिभृतां योगिनामप्यवश्यम् ।
अङ्गीकुर्या वयसि चरमे धर्मभेदानतः स्वं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ५१ ॥

---

४६ परिणमयिता परिणतिरस्य. ४७ हे शत्रुतृणसमूहवह्ने ! तव मुखे जनकवन् संभृतं अत्यादित्यं भूयः तद्धि तेजः भूयात् ।

औदासीन्यं परिहर ततः साम्प्रतं कातरार्हं
निश्चिन्तं तं कुरु निजपतिं वैरिवारं विजित्य ।
युद्धे किं न स्मरसि घनवद् वैरिणां ते पिता य-
द्धारापातैस्त्वमिव कमलान्यभ्यवर्षद् मुखानि ॥ ५२ ॥

सीदन्तं किं सदयहृदयोपेक्षसे बन्धुवर्गं
वाञ्छन् शुद्धिं त्वमिह विविधैर्दुस्तपैस्तैस्तपोभिः ? ।
दत्तैः पात्रे सततममले गेहिधर्मे स्वचित्तै-
रन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ ५३ ॥

रन्त्वाऽऽवाभ्यां चिरमुपवने जातगात्रश्रमाभ्यां
सस्ने यत्र प्रिय! कलजला स्वर्धुनी भाति सेयम् ।
मुक्त्वा मां किं भ्रमसि भुवि येतीव फेनैर्हसन्ती
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५४ ॥

अस्यां शस्याशय! यदि भवान् नीरकेलिं प्रकुर्याद्
युक्तस्ताभिः प्रिय! सह मया मद्वयस्याभिराभिः ।
धौतैरासां मृगमदभरैः कज्जलैर्वा तदेपा
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥ ५५ ॥

क्रीडां तत्र त्वयि रचयति प्रीतचित्ते नितान्तं
स्वर्णोच्छ्रङ्गीनिहितसलिलक्षेपणावैर्विनोदैः ।
रोधः क्षुण्णं तव हयखुरैर्लप्स्यते नाथ! तस्याः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५६ ॥

धर्मेष्वाद्यामिह खलु दयामादिदेवो जगाद
प्रोज्झन्नेतां निजपरिजने वेत्सि धर्मं न सम्यक् ।
सीदन्तं तन्निजजनममुं पालय स्वार्जितैः स्वै-
रापन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५७ ॥

आसाद्येदं निजपितृपदं पालयिष्यत्यसौ नो
नूनं चित्ते सचिवसुहृदो ये विचार्येति तस्थुः ।

---

५२ त्वं किं न स्मरसि ? यत्तव पिता युद्धे धारापातैर्वैरिणां मुखानि अभ्यवर्षत्, घनवत् । मुखानि कानीव, यथा घनो मेघः कमलानि नीराणि वर्षति ।
५६ वृषोत्खातपङ्कोपमेयमित्यपि पाठः, स च रोधोविशेषणम् ।

प्राप्ते दीक्षां भवति यत ! तानाकमिष्यन्त्यमित्राः
　　के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ? ॥५८॥
मा जानीष्व त्वमिति मतिमन् ! यद् व्रतेनैव मुक्ति-
　　र्लेभे श्वभ्रं व्रतमपि चिरं कण्डरीकः प्रपाल्य ।
गार्हस्थ्येऽपि प्रिय ! भरतवद् वीतरागादिदोषाः
　　संकल्पन्ते स्थिरगुणपदप्राप्तये श्रद्दधानाः ॥ ५९ ॥
क्रीडाशैलं प्रिय! भज निजं तं विनोदाय यस्मिन्
　　शब्दायन्ते मधुरमनिशं कीचका वायुयोगात् ।
नादज्ञस्यालमिव तव सत्किन्नरीगीतनृत्यैः
　　सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ६० ॥
हित्वा स्वाद्रिं जिनपतिमहाचैत्यपूते प्रभूते
　　स्त्रीभिः सार्द्धं विबुधनिचया यत्र खेलन्ति नाथ ! ।
तिर्यग्व्याप्य क्षणगिरिरिवाभ्रं गतो भ्राजते यः
　　श्यामः पादो वलिनियमनाभ्युद्यतस्येव विष्णोः ॥ ६१ ॥
शैले लीलागृहमिह महत् कारितं तेऽस्ति पित्रा
　　तस्मिन् वासं कुरु वर! चिरं चेद्रतिर्नो तवात्र ।
श्वेतज्योतिःस्फटिकमणिभिर्निर्मितं भ्राजते यद्
　　राशीभूतः प्रतिदिनमिव व्यम्बकस्याट्टहासः ॥ ६२ ॥
त्वय्यारूढे रजतरचितं सारमुच्चैर्गवाक्षं
　　देहच्छायाजितहरिरुचौ चारु कृत्वा विनोदान् ।
पश्यत्वेष प्रिय ! परिजनः साधु सौधस्य शोभा-
　　मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६३ ॥
तस्मिन्नद्रौ भवभयहरं नाभिजन्मानमीशं
　　नत्वा देवं तदनु सुभगाऽऽलोकयेः कौतुकानि ।

५९–रोपादीत्यपि पाठः । मुक्तिपदप्राप्तये इत्यर्थः । ६० कीचकाः सच्छिद्र-वंशा. । तत्र तव सङ्गीतार्थो नाट्यार्थः समग्रो भावी, किंलक्षणः, ते तव पशुपते-रिव शिवस्येव नादज्ञस्य नादविज्ञस्य अलमत्यर्थम् । ६१ वलिबन्धनकृतो हरेः । ६२ प्रतिदिशमिवेति पाठान्तरम् ।

आयान्त्या मे भवदनु पुनर्वर्त्म कुर्वन् सुगम्यं
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६४ ॥
शृङ्गे तस्मिन् नयनसुभगं चारुरूपा यदि त्वां
विद्याधर्यः स्मरविधुरिताः प्रार्थयेयुर्निरीक्ष्य ।
अक्षोभ्यस्त्वं सुरयुवतिभिर्नाथ ! धिक्कारवाचां
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६५ ॥
आरामेषु प्रिय ! विरचयंस्तत्र पुष्पावचायं
श्रान्तो भ्रान्त्या सुभग ! विदधद् दीर्घिकास्वम्बुकेलिम् ।
वादित्राणां मधुरनिनदैर्नर्तयन् केकिवृन्दं
नानाचेष्टैर्जलदललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६६ ॥
आगच्छेः स्वां पुनरपि पुरं नाथ ! नीत्वा दिनानि
क्रीडाशैले कतिचिदसमां दर्शयन् स्वश्रियं ताम् ।
यत्राभ्राग्रैर्वहति बहुलैर्धूपधूमैः सदा द्यौ-
र्मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६७ ॥
स्निग्धच्छायं बहुलविमलच्छायया शालमाना-
न्नित्यामोदाः प्रविततमुदं भूरिवित्ताः सुवित्तम् ।
रत्नज्योतिर्विधुततमसो नाथ ! निर्धूतपापं
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६८ ॥
अर्हद्भक्तिर्वसति हृदये तारहारेण सार्कं
मूर्त्तौ कान्तिः स्फुरति च सदा शीलधर्मेण सार्द्धम् ।
चित्ते सातं घनसमयजं विद्यते साम्प्रतं सत्
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६९ ॥
गङ्गागौराः सितकरहयाकारचौरास्तुरङ्गाः
शृङ्गोत्तुङ्गा ललितगतयो दानवन्तो गजेन्द्राः ।
लीलावत्योऽखिलयुवतयो यत्र वीरावतंसाः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासत्रणाङ्कैः ॥ ७० ॥

---

६९ यत्र साम्प्रतं वधूनां चित्ते त्वदुपगमजं त्वदागमनोद्भवं सातं सुखं विद्यते, च पुनरर्थे, सीमन्ते घनसमयजं प्रावृट्जातं नीपं कदम्बकुसुमं विद्यते । ७० निराकृताभरणरुचयश्चन्द्रहासरूपखड्गव्रणाङ्कैः ।

स्नेहादन्यद् न भवति परं बन्धनं यत्र किञ्चिन्
चिन्ता काचिन्न भवति परा यत्र धर्मं विहाय ।
कश्चिद् यस्मिन् न भवति परो राजहंसान् सरोगो-
वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ७१ ॥

वेणीदण्डो जयति भुजगान् मध्यदेशो मृगेन्द्रान्
यासामास्यं प्रिय ! परिभवत्युच्चकैश्चन्द्रबिम्बम् ।
चैत्ये नृत्यन्त्यतुलमसकृद् यत्र वाराङ्गनास्ता-
स्त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ७२ ॥

मालास्रस्तैर्विविधकुसुमैः कुङ्कुमाक्तांहिचिह्नै-
स्ताम्बूलेन क्षितितलगतेनार्द्रजम्बेन यत्र ।
हेमाम्भोजैः श्रवणपतितैर्भूषितैर्भूरिवासै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ७३ ॥

यत्र स्त्रीणां प्रणयिषु हठादाक्षिपत्सु क्षपायां
क्षौमं साक्षाद् मनसिजपराधीनतामागतेषु ।
नित्योद्योतानपि मणिमयान् प्राप्य दीप्रान् प्रदीपान्
ह्रीमूढानां भवति विफलप्रेरितश्चूर्णमुष्टिः ॥ ७४ ॥

यस्यां लोका विमलमनसः पूर्णकामाभिरामा-
रामाः कामं ललितगमनाः कामनारीसमानाः ।
वृक्षाः साक्षाद्तुलफलदाः कल्पवृक्षोपमेया-
नित्यज्योत्स्नाप्रतिहततमोवृत्तिरस्याः प्रदोषाः ॥ ७५ ॥

यस्यामन्तः सुकृतरसिकाः पात्रदानप्रवीणा-
एनोहीना विततविलसत्कीर्तयः सन्ति सन्तः ।
वारस्त्रीभिः सह सुमुदिताः काममम्राश्च कामं
वद्ध्वा यानं बहिरुपवनं कामिनो निर्विशन्ति ॥ ७६ ॥

गच्छंस्तूर्णं नभसि तरणिः शङ्कते नित्यमेवं
सौधेष्वेषु स्खलतु मम मा स्यन्दनोऽभ्रंलिहेषु ।
मेघा यस्यामतिगुरुगृहैः प्राप्य सद्यद्दमाराद्

---

७१ खलु च वय इत्यपि । ७४ –प्रेरणा चूर्णमुष्टिरित्यपि पाठः । ७५ नित्यं ज्योत्स्ना इत्यपि पाठान्तरम् ।

धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ७७ ॥
यान्त्यो व्योम्नि त्रिदशललना वीक्ष्य यासां स्वरूपं
सर्वं गर्वं मनसि रचितं चारुतायास्त्यजन्ति ।
मुग्धा दुग्धोपचितवपुषः कुट्टिमेष्वस्तखेदं
सङ्क्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ७८ ॥
घर्मस्वेदं सुरतजनितं योषितां यत्र रात्रौ
जालायातैः स्वगृहवलभीमध्यवद्धस्थितीनाम् ।
सारैस्ताराधिपतिकिरणैश्चन्द्रकान्ताश्च्योतिता द्योतिताशै-
र्व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ७९ ॥
काले वर्षन्नवनिवलयं सस्यपूर्णं वितन्वन्
वाञ्छातुल्यं दिशति सलिलं यत्र धाराधरोऽपि ।
त्यागो यस्यां धनिभिरनिशं दीयमानोऽर्थिनां द्रा-
गेकं सूते सकलमवलाऽऽमण्डनं कल्पवृक्षः ॥ ८० ॥
तिष्ठन्नस्यां पुरि विषयजं नाथ ! सौख्यं भज त्वं
कुर्वन् धर्मं भवति सफलं येन जन्मद्वयं ते ।
हित्वा चापं युवतिषु चिरं यत्र कामोऽपि तस्थौ
तस्यारम्भश्चतुरवनितालोचनैरेव सिद्धः ॥ ८१ ॥
निर्यद्वाष्पं वच इति चिरं प्रोच्य तस्यां स्थितायां
सोऽवोचत् तामभजममलं तन्व्यहं जैनधर्मम् ।
स्वर्गोऽप्यस्माद् मम स न मतश्चिन्तितं यत्र दत्ते
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ ८२ ॥
कृत्याकृत्यं गणयति भवान् हन्त ! येषां कृते नो
दृष्ट्वा हृष्यत्यनुदिनमलं खिद्यते यानऽदृष्ट्वा ।
प्रान्तं प्राप्तं स्वजननिचयास्तेऽप्यहो ! सत्सरोवद्
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ ८३ ॥
निःसङ्गानां गुणगणभृतां यो मया श्रीगुरूणा-

---

७८ सुरुपामिति च पाठः । ८० यस्यां पुर्यां त्याग एकं अद्वितीयं सकलं अवलानां निःस्वानाम्, आ समन्तात् मण्डनं सूते । किंलक्ष० त्यागः, अर्थिनां कल्पवृक्षः । ८२ हे तन्वि!

मैवं मुग्धे ! भवभयहरोऽप्यत्र पुण्योपदेशः ।
हारेणेव द्युतितनिभृताऽप्यत्र शश्वद् मनोऽन्तः
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ८४ ॥
(युग्मम्)

जिग्ये कामः सुतनु ! न मया शीलमासाद्य यस्मात्
संज्ञाहीनौ रसकुनवकावप्यहो ! नः सरागौ ।
नार्या एकोऽभिलषति भृशं दर्शनं मण्डितायाः
वाक्कल्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः ॥ ८५ ॥

नीरागं मे समजनि मनो ज्ञाततत्त्वस्वरूपं
तेनेदानीं न विषयरसो बाधते क्वचिद् माम् ।
पश्यास्येनामपि वनसमां चित्रशालां खलूच्चै-
र्यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥ ८६ ॥

यत्तारुण्ये मनि वपुरहो ! विभ्रमं भूरि दत्ते
पुष्टं मुग्धे ! सरसमधुराहारयोगेण शश्वत् ।
अन्यादृक् स्यान् नदपि च गते यौवने देहभाजां
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ ८७ ॥

मत्वाऽनित्यं जगदिति मनो मे विलग्नं जिनोक्ते
धर्मे शर्माभिलषति परं शाश्वतं शुद्धचित्ते !।
मुग्धे ! स्निग्धां रचयसि मुधा मामुदीक्ष्य स्वकीयां
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ८८ ॥

नारी यस्मिन्नमृतसदृशी मे बभूवाद्य यावद्
रागग्रस्ते मनसि मदनव्यालविध्वस्तसंज्ञे ।
ध्वस्ते रागे गुरुभिरभवत् क्ष्वेडवन् साऽप्यनिष्टा
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥ ८९ ॥

अज्ञानं मे सपदि गलितं मोहमूर्च्छाऽप्यनेश-
ज्जातं चित्तं सुतनु ! मम तन्निर्विकारं क्षणेन ।
स्वस्रा मृत्योरिव हि जरसा ग्रस्यमानां तनुं त्वां

---

८४ त्वां प्रेक्ष्यापि मनोऽन्तः शश्वन्निरन्तरमेवोपदेशं स्मरामि अहम् । किलक्ष० त्वां, द्युतिततिभृता हारेण उपान्तस्फुरिततडितमिव । ८७ शोभाम् । ९० -प्यनश्य- इत्यपि ।

मन्ये जातां तुहिनमथितां पद्मिनीं वाऽन्यरूपाम् ॥ ९० ॥

तस्मिन्नेवं वदति चतुरोवाच तस्या वयस्या
जातं किं ते सुभग ! हृदयं निर्दयं वाढमेतत् ? ।
पश्याऽस्यास्त्वं तव विरहतो वक्त्रमभ्रास्तदीप्ते-
रिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥ ९१ ॥

एषाऽनैषीत् सुभग ! दिवसान् कल्पतुल्यानियन्तं
कालं बाला बहुलसलिलं लोचनाभ्यां स्रवन्ती ।
अस्याद् दुःस्था तव हि विरहे मामियं वार्त्तयन्ती
कच्चिद्भर्त्तुः स्मरसि रसिके ! त्वं हि तस्य प्रियेति ॥ ९२ ॥

मूर्छान्ते सा सुभग ! रुदती वारिता दीननादं
प्रातः सायं सखि ! वद कदाऽसौ समेतेत्यवग् माम् ।
लातुं वेलां तव सुललितं गीतमुद्गातुकामा
भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥ ९३ ॥

पृष्ट्वा पृष्ट्वा गणकनिचयं जीवितं धारयन्ती
नीत्वा नीत्वा कथमपि दिनान्यङ्गुलीभिर्लिखन्ती ।
गत्वा गत्वा पुनरपि पुनर्द्वारि तस्थौ च गेहे
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ९४ ॥

शृङ्गारं स्वं सुभग ! विरहेऽङ्गारवत् संत्यजन्ती
दुःखेनाऽलं निजपरिजनं दुःखदिग्धं सृजन्ती ।
प्रेम्णा बद्धां निपुण ! भवता तां मुहुः संस्पृशन्ती
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥ ९५ ॥

नीता रात्रिः क्षण इव पुरा या त्वयेद्धाऽपि सार्द्धं
क्रीडायोगैः सुरतजनितैश्चारुभोगोपभोगैः ।
निःश्वासौघैर्निजतनुगतं चन्दनं शोषयन्ती
तामेवोष्णैर्विरहजनितैरश्रुभिर्व्यापयन्ती ॥ ९६ ॥

दत्त्वा दुःखं मम किमु सुखं हा ! विधातस्त्वयाऽऽप्तं ?
जानात्यन्यो न हि परगतां वेदनां वाऽत्र कश्चित् ।

---

९१ चतुरानाम्नी तस्या वयस्या उवाच । अभ्रास्तदीप्तेरितीन्दोर्विशेषणम् ।
९२ कच्चिदिति कोमलामन्त्रणे ।

निन्दित्वाऽलं विविधवचनैर्दैवमेवं प्रमीला-
माकाङ्क्षन्ती नयनसलिलोत्पीडरुद्धावकाशाम् ॥ ९७ ॥
संमृज्याश्रुप्लुतमथ निजं दिक्षु चक्षुः क्षिपन्ती
क्षौमान्तेन स्वमनसि जगज्जानती शून्यमेतत् ।
स्मृत्वा स्मृत्वा तव गुणगणं भूमिपीठे लुठन्ती
साभ्रेऽह्नीव स्थलकमलिनी न प्रबुद्धा न सुप्ता ॥ ९८ ॥
आलोक्याऽस्यास्तव विरहजं चेष्टितं यन्न भिन्नं
तज्जानीमो वयमिति निजं वज्रसारं हृदेतत् ।
कारुण्यं तत्सदयहृदयाऽत्रोचितं ते विधातुं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९९ ॥
अस्मद्वाक्यं यदि न हि भवान् मानयिष्यत्यदोऽपि
प्राणत्यागं तदियमचिरान् सा विधास्यत्यवश्यम् ।
भूयो भूयः किमिह बहुना जल्पितेनाऽत्र भावि ?
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ॥ १०० ॥
वार्त्ताव्यग्रां तुदति न तथा त्वद्वियोगोऽहनीमां
यद्वद्रात्रौ कृतबहुशुचं चन्द्ररोचिश्चितायाम् ।
पश्यत्वेनां स्वयमपि भवानद्य भूमीशयानां
तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ १०१ ॥
विज्ञप्तिं मे सफलय कुरु स्वं मनः सुप्रसन्नं
सख्या साकं मम भज पुनर्देव ! भोगान् विचित्रान् ।
वामाक्ष्यस्यास्त्वयि सति मुहुः स्पन्दमेत्य प्रसन्ने
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीव ॥ १०२ ॥
जेष्यत्याऽऽस्यं प्रमुदितमलं मेघमुक्तस्य शस्यां
शोभामिन्दोर्विकसितरुचेश्चारुरोचिश्चितं स्राक् ।
प्राप्ते प्रीतिं भवति सुभगाऽऽनन्दितायाः किलास्या-
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ १०३ ॥
दुःखक्षामा न खलु सहते बाढमाश्लेषमेषा

---

९८ वस्त्राञ्चलेन । १०२ अस्या वामनेत्रम् । १०३ मनोज्ञकान्तिव्याप्तम् ।

मद्बाहुभ्यां सदय ! मनसीदं स्वकीये विचार्यं ।
कार्पीदस्याः प्रथममिलने मा भवान् स्नेहवत्याः
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ १०४ ॥
त्वामायातं शयनसदने वीक्ष्य लज्जाऽन्विताङ्गी
नो कुर्याच्चेत् तव सुहृदय ! स्वागतं सा सखी नः ।
स्नेहस्निग्धैर्मधुरवचनैराधिमुग्भिस्तदानीं
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ १०५ ॥
किं काठिन्यं त्यजति न भवानागतोऽपि स्वगेहे
स्वीयां जायां न हि निजदृशा स्नेहतो वीक्षतेऽपि ?।
प्रावृट्कालो रचयति मनांस्यध्वगानामयं द्राग्
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ १०६ ॥
मान्या तेऽहं सुभग ! सततं वच्मि तेनैव बाढं
वाक्यं मे तत् परिणतिशुभं मानयेदं वदान्य !।
मत्तो ज्ञात्वा व्यतिकरममुं लप्स्यते निर्वृतिं सा
कान्तोदन्तः सुहृदुपहृतः संगमात् किंचिदूनः ॥ १०७ ॥
स्वामिन् ! जानन्नपि नयविधिं प्रोक्तवानन्यदन्यत्
क्षेमप्रश्नं किमिति न भवानेकवारं चकार ?।
विश्वेऽप्यस्मिन् खलु सुखभृतामप्यहो ! दैववश्ये
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ १०८ ॥
गेहस्याऽन्तर्व्रजति न भवान् भाषते नापि पत्नीं
सौधेऽपि स्वे वसति परवद् नो भजत्युग्रभोगान् ।
लप्स्ये स्वर्गे सुखमिति वृथा चिन्तितैस्तीव्रकृच्छ्रैः
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ १०९ ॥
त्राता नस्त्वं सुभग ! शरणं जीवितव्यं त्वमेव
त्वं नः प्राणा हृदयमसि नस्त्वं पतिस्त्वं गतिर्नः ।
ज्ञात्वाऽपीत्थं प्रिय ! परिहरन् नो न किं लज्जसे सा ?
त्वामुत्कण्ठातरलितपदं मन्मुखेनेदमाह ॥ ११० ॥
श्रुत्वा साधुस्तदुदितमथोवाच कोशां स भूयो
धर्मं श्रीमज्जिननिगदितं चेद् भजेथास्त्वमार्ये !।

---

१०५ त्वामायान्तं इत्यपि । १०६ स्नाग् इत्यपि ।

चातुर्येणाऽखिलयुवतिषु क्ष्मातले तद्विशाले
हन्तैकस्थं क्वचिदपि न ते सुभ्रु ! सादृश्यमस्ति ॥ १११ ॥
तुल्यं स्त्रैणं तृणमपि च मे शुद्धशीलप्रभावात्
प्रागासीना भवति भवती येषु येष्वासनेषु ।
नेहे ब्रह्मव्रतकृतरतिस्तन्वि ! तत्राऽऽसितुं तत्
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ११२ ॥
चातुर्मास्यं समजनि शुभे ! पूर्णमेतत्सुखेन
त्वद्गेहे मे समभवदहो ! शीलहानिर्न काचित् ।
यायां पादानथ निजगुरोर्वन्दितुं कर्मनाशे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ ११३ ॥
धर्मं तावद् भजतु भवती वीतरागप्रणीतं
दानं शीलं तप इह शुभो भाव एवंप्रकारम् ।
गन्तव्यं वै सुतनु ! मयका प्रावृषोऽहानि नीत्वा
दिक्संसक्तप्रविरलघनव्यस्तसूर्यातपानि ॥ ११४ ॥
ज्ञाते धर्मे जिननिगदिते तेऽपि नो भावि दुःखं
मुग्धे ! तस्मादिह परभवे लप्स्यसे त्वं च सौख्यम् ।
अस्मच्चेतो जिनमतगतं नाऽभजन् कापि दुःखं
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ११५ ॥
जैने धर्मे कुरु निजमतिं निश्चलां तन्वि ! नित्यं
शीलं धेहीहितसुखकरं देहि दानं गुणिभ्यः ।
पापव्यापव्यतिकरजुषां धर्मभाजां च पुंसां
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ११६ ॥
शुद्धिं भद्रे ! रचय तपसा स्वस्य तेनात्मनस्त्वं
दृष्ट्वा क्लृप्तं मुनिभिरतुलं यद् वनस्थैस्त्रिशुद्ध्या ।
हर्षेणोच्चैर्दिवि दिविषदां पुष्पवृष्ट्या समं स्राग्
मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतन्ति ॥ ११७ ॥
कोशा प्रोचे प्रिय ! विगलिता साऽद्य मे भोगतृष्णा

---

१११ चण्डि ! इत्यपि । ११३ यास्ये इति च । तस्मिन् प्रसिद्धे कर्मनाशे क्रूरः नौ आवयोः कृतान्तः सिद्धान्तो न सहते । ११७ यच्च तस्थे त्रिशुद्धया इति पाठान्तरम् । अश्रुलेशा अश्रुबिन्दवः ।

वाक्यैरेभिस्तव हृदि निजे या मयेत्थं धृताऽभूत् ।
आवां भूयो विरहविगमे भोगभङ्गीं विचित्रां
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ११८ ॥
स्वामिन् ! धर्माऽमृतरसमयं देहि दिव्यौषधं तद्
येनायं मे तुदति न मनो मन्मथाख्यो विकारः ।
त्वद्वाक्येनोज्झितविषयया यद्वशाद्य रात्रौ
दृष्टः स्वप्नेऽकितव ! रमयन् कामपि त्वं मयेति ॥ ११९ ॥
इत्युक्तोऽसौ चरणनतया कोशया भक्तिपूर्वं
तद्वृत्तेन प्रमुदितमनाः सादरं साधुराजः ।
प्रादादस्यै भवभयहरं स्वं नमस्कारमन्त्रं
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ १२० ॥
तामूचेऽसौ मनसि सततं मन्त्रमेनं स्मर त्वं
नित्यं भक्त्या त्रिभुवनगुरोर्जन्म सार्थं सृज स्वम् ।
शीलेनाऽलं विमलममले ! जैनधर्मं भजेथाः
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ १२१ ॥
धन्यंमन्या मुनिवचनतोऽङ्गीचकाराऽखिलं तत्
प्रीतिं भेजे मनसि परमां साऽऽप्तसम्यक्त्वलाभा ।
दुष्टे द्वेषं गुरुनिगदिता यान्ति धर्मोपदेशा-
इष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ १२२ ॥
भद्रे ! भद्रं भवतु सततं ते जिनेन्द्रप्रसादात्
नन्तुं पादानथ निजगुरोरेष यास्यामि शस्यान् ।
ध्यायन्त्यै श्रीजिनपरिवृढं शीलरत्नेन शश्वद्
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ १२३ ॥
नीत्वा मासानथ स चतुरस्तत्र सच्छीलशाली
गत्वा सूरीन् समयचतुरो भूरिभक्त्या ववन्दे ।
तस्थौ गेहे मनसि दधती सा सुखं जैनधर्मं
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥ १२४ ॥
यात्वा पारं समयजलधेः स्थूलभद्रः स भेजे
सूरीशत्वं भुवि जनमनो रञ्जयामास कामम् ।

---

११९ स्वच्छप्रकृते ! । १२३ किं० शीलेन, विद्युता विशिष्टद्युतिना ।

हित्वा तत्त्वामृततररसैः साऽपि चित्तं स्वमिद्धा-
निष्टान् भोगानविरतमुखं भोजयामास शश्वत् ॥ १२५ ॥
कुर्वन्नुर्वीवलयमखिलं जैनधर्माऽनुरक्तं
व्यक्तं चित्रं विदधदतुलं शीलशक्त्या त्रिलोक्याम् ।
भूमीपीठे स्मरहठहरो दीर्घकालं विहारं
चक्रे वक्रेतरमतिरसौ स्थूलभद्रो मुनीन्द्रः ॥ १२६ ॥
सच्चारित्रं यतिपतिरसौ कर्मवल्लीलवित्रं
दीर्घं कालं कलितविमलज्ञानदानः प्रपाल्य ।
भेजे स्वर्गं त्रिदशललनालोचनाब्जार्कतुल्यो
निःशल्यान्तर्निरुपमसुखं वीतनिःशेषदुःखम् ॥ १२७ ॥
कोशाऽपि श्रीजिनमतरता शीलमाराध्य सम्यक्
पत्युः स्नेहादिव दिविषदां धाम सा स्वाग् जगाम ।
आपद् व्यापद्रहितमतुलं तत्र सातं विशेषा-
दत्राऽमुत्र प्रदिशति सुखं प्राणिनां जैनधर्मः ॥ १२८ ॥
तारायन्ते ततमतिभृतोऽप्यन्यतीर्थ्या इदानीं
विश्वे विश्वे खलु यदमलज्ञानभानुप्रभायाम् ।
सोऽयं श्रीमानवनिविदितो रत्नसिंहाख्यसूरि-
र्जीयाद् नित्यं नृपतिमहितः सत्तपोगच्छनेता ॥ १२९ ॥
शिष्योऽमुष्याऽखिलबुधसुदे दक्षमुख्यस्य सूरे-
श्चारित्रादिर्धरणिवलये सुन्दराख्याप्रसिद्धः ।
चक्रे काव्यं सुललितमहो ! शीलदूताभिधानं
नन्द्यान् सार्धं जगति तदिदं स्थूलभद्रस्य कीर्त्या ॥ १३० ॥
द्रङ्गे रङ्गैरतिकलतरे स्तम्भतीर्थाऽभिधाने
वर्षे हर्षाज्जलधिभुजगाऽम्भोधिचन्द्रे प्रमाणे ।
चक्रे काव्यं वरमिह मया स्तम्भनेशप्रसादात्
सद्भिः शोध्यं परहितपरैरस्तदोषैरसादात् ॥ १३१ ॥

इति श्रीवृहत्तपोगच्छनायकभट्टारकश्रीरत्नसिंहसूरिशिष्यो-
पाध्यायश्रीचारित्रसुन्दरगणिविरचितं शीलदूताभि-
धानं समस्यामयं काव्यं समाप्तम् ।

---

१२५ समिद्धानिलपि । १३० –ऽमुख्योऽ– इति च ।